

## महाकविदण्डिविरचितः

# काव्यादर्शः

## (उपमाचक्रान्तः)

(राजस्थान-माध्यमिक शिक्षा बोर्ड निर्धारितं पाठ्यक्रमानुसारं कनिष्ठोपाध्याय कक्षायै स्वीकृतंपुस्तकम्)


**संयोजकः लेखकः**
**व्याख्याकारश्च**

**प्रो. लक्ष्मीनारायण आसोपा**
प्राचार्यः
राजकीय आचार्य संस्कृत महाविद्यालयः
मनोहरपुरम्, जयपुरम्



माध्यमिक शिक्षा बोर्ड राजस्थान-अजमेर

प्रकाशक
राजस्थान राज्य पाठ्यपुस्तक मण्डल, जयपुर

# प्रस्तावना

## अलकांर-शास्त्रम्

काव्यशास्त्रं समाजस्य चित्रं स्वीक्रियते। कान्तदर्शी कुशलः कविः स्वप्रतिभया समाजस्य सर्वाङ्गं चित्रं स्वकाव्येषु समुपस्थापयति-तस्य नियमानां स्वरूपस्य दोषगुणानां रीतिप्रभृतिकस्यापि विवेचनम् काव्यकरणे तस्य यथार्थरूपस्य बोधाय परमावश्यकम् भवति

एतादृशाय विवेचनाय प्रस्तुता ग्रन्थाः साहित्यशास्त्रे भवन्ति।

साहित्शास्त्रस्य एव परिमार्जितं संक्षिप्तं वा रूपम् अलंकारशास्त्रं भवति। समालोचका विद्वांसः स्वप्रतिभा द्वारा महत्या खलु सूक्ष्मेक्षिकया समुपयोगिनाम् काव्यांगानाम् वर्णनेन समाजस्य पाठकस्य वा समक्षं सामग्रीं समुपस्थापयन्ति।

## अलङ्कारशब्दार्थः

अलङ्.कार शब्दः भूषणवाचकः। येन अंगस्य अंगद्वारेण च अंगिनः आत्मनः शोभावृद्धिर्भवति-सः अलंकार कथ्यते। अलंकारस्य लौकिकप्रयोगविषयो यावान् व्यापकः प्रसिद्धश्च वर्तते-शास्त्रीय प्रयोग-विषयोऽपि तावानेव प्रसिद्धः व्यापकश्च।

यथोक्तञ्च हारादिवदलंकारास्तेऽनुप्रासोपमादयः।

काव्यशोभाकरान् धर्मानलंकारान् प्रचक्षते।

## अलङ्.काराणामाविर्भावः

मानव समाजस्य आदिभाषायाममपि अस्य प्रयोगः अवश्यमेव भवति स्म। संसारस्य एकाऽपि भाषा नास्ति यस्याम् आलङ्.कारिक प्रयोगो न भवति ऋग्वेदः अतिप्राचीनः ग्रन्थ तत्र अलंकाराणाम् च प्रयोगः प्रचुरमात्रायां प्राप्तो भवति यथा -

**चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य**

**त्रिधा बद्धो वृष भो रोरवीति महो देवो मर्त्या आविवेश।। ऋग्.४-५८-३**

**सिंहा इव मा न दन्ति प्रचेतसः पिशा इव सुधिशः विश्ववेदसः। ऋग्.१-६४-८**

**तद्विष्णोः परमं पदं दिवीव चक्षुराततम् सदा पश्यन्ति सूरयः ऋग. १-२२-२०**

एषु रूपकस्य उपमायाश्च रमणीय प्रयोगः स्पष्टरूपेण प्रतीयते।

## अलङ्.कारशास्त्रस्य क्रमिकविकासः-

अलंकाराणां क्रम विकासस्य उपरि विचारे कृते ज्ञायते यत् भरतमुनिकृते नाटयशास्त्रे केवलाः चत्वार एवालंकारा उल्लिखिताः। अग्निपुराणे षोडश अलंकारा गणिताः। ततः भामहस्य अलंकारसूत्रम् तत्र तेन अष्टात्रिंशत् अलंकाराः निरूपिताः परन्तु दण्डिना सप्त त्रिंशत् अलंकाराः स्वीकृताः एवं प्रकारेण सहस्त्रशोहि महात्मभिः अलंकारप्रकाराः प्रकाशिता प्रकाश्यन्ते च।

**नवीनतमं वर्गीकरणं यथा-**

१.उपमामूलकाः-उपमा,उपमेयोपमा,अनन्वय,स्मरणादिः

२.आरोपमूलकाः-रूपकम् परिणामः सन्देहः भ्रान्तिमान्

३.अध्यवसायमयूलकाः-उत्प्रेक्षा अतिशयोक्तिप्रमृतयः

४.गम्यमान सादृयमूलकाः-तुल्ययोगिता दीपकादयः

५.भेदमूलकाः-व्यतिरेक-विनोक्ति प्रभृतयः

६.विशेषणादि वैचित्र्यमूलकाः-समासोक्तिपरिकरादयः

७.विरोधमूलकाः-विरोधविभावना व्याधातादयः

८.तर्कमूलकाः-अनुमान-काव्यलिंगादय

६.काव्यन्यायमूलकाः-मीलित सामान्य तद्गुणादयः

१०.लोकवृत्तेपन्यास मूलकाः- मीलितसामान्यतद्गुणादयः

११.गूढार्थाभिव्यक्तिमूलकाः-सूक्ष्म् व्याजोक्तिः

१२.रसादिसम्बन्धमूलकाः-रसवत् प्रेय इत्यादयः

## काव्यादर्शपरिचयः

काव्यादर्श रीतिसम्प्रदायस्य साहित्यशास्त्रसम्बन्धी ग्रन्थः अस्ति। सम्प्रति ये प्राचीना लक्षणग्रन्थाः उपलब्धा भवन्ति-भामहस्य अनन्तरं दण्डिनः काव्यादर्श एव सुलभः।

**काव्यादर्शस्य त्रयः परिच्छेदाः**

प्रथमे परिच्छेदे काव्य परिभाषा काव्यभेदाः महाकाव्यादिलक्षणम् गद्यप्रभेदा कथा आख्यायिका मिश्रकाव्यम् भाषाप्रभेदा

वैदर्भादयः मार्गा काव्यकारणम् इत्यादि विवेचित मस्ति।

द्वितीये परिच्छेदे ३५ अर्थालंकाराः सलक्षणोदाहरणं भेदोपभदसहिता निरूपिताः।

तृतीये परिच्छेदे यमकप्रपञ्च गोमूत्रिकादि चित्रबन्धः प्रहेलिका तथा दोषा श्च सम्यक् निरूपिताः

दण्डिनः व्यक्तित्वम्-

अवन्तिसुन्दरीकथायाः अवन्तिसुन्दरीकथासारस्य च आधारेण नारायण- स्वामिनः पुत्रः भारविः किरातार्जुनीयस्य रचयिता तस्य त्रयः पुत्रा बभूवुः, येषु मध्यम पुत्र मनोरथ आसीत्। मनोरथस्य चतुर्षु पुत्रेषु कनिष्ठः पुत्र वीरदत्तः। वीरदत्तस्य स्त्री गौरी आसीत् अनयोरेव पुत्रः महाकविर्दण्डी असौ कौशिक गोत्रजः ब्राह्मणः आसीत् अस्य वास्तविकं नाम किमासीदिति न ज्ञायते परन्तु दशकुमार चरितस्य मंगलाचरणम् वर्तते

ब्रह्माण्ड च्छत्रदण्डः शत धृति भवनाम्भोरुहोनालदण्डः,

क्षोणी नौ कूपदण्डः क्षरदमर सरित् पट्टिकाकेतुदण्डः।

ज्योतिश्चक्राक्षदण्डस्त्रिभुवन विजयस्तम्भदण्डोऽङ्घ्रिदण्डः
श्रेयस्त्रैविक्रमस्ते वितरतु विबुध द्वेषिणां कालदण्डः।

एवं प्रकारेण अष्टवारं दण्डशब्दस्य प्रयोगं कृतवान् अत एव दण्डी इति प्रसिद्धो बभूव किल।

**दण्डिनः देशकालौ-** दण्डिनः पूर्वजा गुजरातप्रान्तस्य आनन्द पुरात् आगत्य दक्षिणदेशस्य अचलपुरे निवासं कृतवन्तः। काञ्ची-कावेरी-चोल-कलिंग-मलयानिलादीनां दक्षिणप्रसिद्धानां वर्णनेन अयं दाक्षिणात्य इति अनुमीयते।

असौ स्वप्रपितामहस्य भारवेः आश्रयदातुः नृपवंशस्य आश्रये काञ्चीनगर्यां निवसतिस्म। तत्र आक्रमणं बभूव तदा स कानने निलीनो बभूव। स विप्लवः ६५५ ई० जातः तदा दण्डिनः अल्पावस्था आसीत्।

अनेन सिध्यति यत् दण्डिनः स्थितिकालः सप्तम्याः शताब्द्याः उत्तरार्धः अष्टम्याश्च आदिभागः।

**दण्डिनः पाण्डित्यम्-**

**जाते जगति वाल्मीकौ कविरित्यभिधाऽभवत्। कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि।।**
**उपमा कालिदासस्य भारवेरर्थ गौरवम्। दण्डिनः पदलालित्यम् माघे सन्ति त्रयोगुणाः।।**

इति प्राचीन श्लोकानुसारेण दण्डिनः उत्कृष्टस्य कवित्वस्य परिचयो भवति-

एका किंवदन्ती अपि प्रचलति यत् एकदा दण्डिकालिदासयोः उत्कृष्टतरः क इति विवादो जातः तदा अनयोः परीक्षार्थम् साक्षात् सरस्वती मध्यस्था बभूव तदा उभाभ्यामेव स्व स्व कविताः प्रस्तुता तदा सरस्वतीमुखात् निर्गतम् कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः

**दण्डिनः कृतित्व परिचयः**

**त्रयोऽग्नयस्त्रयो वेदास्त्रयो देवास्त्रयो गुणाः। त्रयो दण्डि प्रबन्धाश्च त्रिषु लोकेषु विश्रुताः।।**

इत्यनुसारेण महाकवेः दण्डिनः त्रयो ग्रन्थाः प्रसिद्धा यथा-काव्यादर्शः, अवन्तिसुन्दरीकथा, दशकुमारचरितञ्च।

काव्यादर्शः दशकुमारचरितञ्चेति ग्रन्थ द्वयन्तु प्रसिद्धमेव परन्तु अवन्तिसुन्दरीकथा अपि अत्र दक्षिणभारतग्रन्थावल्यां मुद्रिता भूत्वैव प्रसिद्धिं प्राप्ता छन्दोविचित्यां सकलस्तत्प्रपञ्चः प्रदर्शितः इति उल्लेखेन अनुमीयते यत् छन्दोविचितिनामकः चतुर्थ ग्रन्थो भवेत् परन्तु अत्र तु संशय एव वर्तते।

दण्डिनः पदलालित्यम् इत्यपि आ भाणकः प्रसिद्धो वर्तते यतः दण्डिनः पदविन्यासः अति ललितो अत् एव स दण्डीति नाम लेभे। पद्यरचनायां लालित्यं यथा-

**ब्रह्माण्डच्छत्रदण्डः इत्यादि गद्यलालित्यं यथा -**
**धनदर्पकन्दर्प सौन्दर्य सोदर्यहृद्य ............**

निरवद्यरूपो भूपो बभूव इत्थं दण्डिनः कृतित्वं खलु रमणीयं लालित्यपूर्णञ्च।

संस्कृतकाव्यशास्त्र जगति दण्डिनः नाम अत्यधिक सम्मानपूर्वकं गृह्यते। आद्याचार्यरूपेण स्वीक्रियते। एतैः प्रस्तुता अवधारणाः सम्पूर्ण परम्पराया उपरि प्रभावशीलाः सन्ति यदि भामह-दण्डिनोः ऐतिहासिकताया विवादे निष्कर्षः प्राप्यते तदा भामहस्य प्राचीनता स्वीक्रियते पुनरपि दण्डिनः महत्त्वन्तु अन्यूनमेव।

**साहित्यशास्त्र परम्परा -**

अति प्राचीना शास्त्रीय चिन्तनधारा तत्र च साहित्यशास्त्रस्य परिपुष्टा परम्परा वरीवर्तते काव्यस्य प्रत्येकं तत्त्वम् अलंकारो गुणः रीतिः वृत्तिः रसो ध्वनिर्वा सर्वत्र गम्भीरं वैदुष्यपूर्णं गम्भीरञ्च तात्त्विकचिन्तनं जातम्। भामहादारभ्य अद्यपर्यन्तं येखलु अलंकारशास्त्रिण आचार्या बभूवुः येषाम् अवधारणाः सम्प्रत्यपि न केवलस्य भारतीयस्य अपितु अन्यान्यस्य वाङ्.मयस्यापि अमूल्याः सम्पत्तयः यासाम् वैज्ञानिकता नूनं स्वतः प्रमाणसिद्धा।

साहित्यशास्त्रस्य काश्चन प्रसिद्धाः विभूतयः जाताः तासाम् संक्षिप्तपरिचयः प्रस्तूयते यथा-

१.भरतमुनिः-अयम् रससम्प्रदायस्य प्राचीनतम आचार्यः नाटयशास्त्र प्रवर्तकः अयम् रसस्यैव प्राधान्यम् स्वीचकार। अस्य जन्म ईशापूर्व प्रथमशताब्दी पूर्वकालिकम् वृद्धभरतः आदिभरतो वाऽयम् कथ्यते नाटयशास्त्रं भारतीयाः ललितकलायाः विश्वकोषः यतः अत्र अलंकारादिशास्त्राणां मूलसिद्धान्ताः प्रतिपादिताः।

२.भामहः-अनेके विद्वांसः भामहस्य जन्मकालम् षष्ठीं शताब्दीं मन्यन्ते। अस्यं काव्यालंकारनामकः ग्रन्थः साहित्यशास्त्रस्य सिद्धान्तान् सम्यक् परिचाययति एतन्मतेन शब्दार्थौकाव्यम्। काव्ये अलंकाराणाम् अनिवार्यतायै ३८ अलंकाराः स्वीकृताः।

३.दण्डी :-काव्यादर्शस्य रचयिता दण्डी साहित्यशास्त्रस्य श्रेष्ठो विद्वान। अस्य जन्म समयः सप्तम्या अष्टम्याश्च शताब्द्या मध्य भागः मतोऽस्ति। पदानां सुन्दरता काव्यस्य प्रधानमङ्गम् यथोक्तञ्च दण्डिनः पदलालित्यम्। अलंकाराः काव्यशोभाया कर्तारः यत्र गुणाना मपि विशिष्टं महत्त्वम् इति दण्डिमतम्।

४.वामनः- वामनः कश्मीरनरेशस्य सचिव आसीत्। अष्टभ्याः शताब्द्या अन्तिमः कालः। रीतिसम्प्रदायस्य प्रतिष्ठापकः आचार्यः रीतिरात्मा काव्यस्य इति सिद्धान्तवादी अस्ति काव्यालंकारसूत्राणि इति ग्रन्थो वर्तते यत्र काव्यशास्त्रीयाः सिद्धान्ता रमणीयतया समालोचिताः।

५.उद्भटः- भट्टोद्भट्ट उद्भट्टभट्ट उद्भट्टाचार्य इत्यादिनामभिः विख्यातः उद्भटः कश्मीरवास्तव्यस्य जयापीडनायकस्य नृपस्य सभापतिरासीत्। राजतरंगिण्या एकस्य श्लोकस्य अनुसारेण ज्ञायते यत् उद्भटः प्रतिदिनं स्वर्णमुद्राः प्राप्नोतिस्म-

**दीनारशत लक्षेण प्रत्यहं कृतवेतनः। भट्टोऽभूद्भटस्तस्य भूमियर्तुः सभापतिः।।**

सर्वशास्त्रज्ञोऽयम् मुख्यरूपेण वैयाकरण आसीत् अलंकारसम्प्रदायस्य च विशिष्टः पृष्ठपोषक एव बभूव। काव्यालंकारसारसंग्रहः अस्य प्रधानग्रन्थः वर्तते।

६.रुद्रटः-कश्मीरवासिनः अस्य रुद्रटस्य जन्म समयः नवम्याः शताब्द्याः पूर्वकालिक इति राजशेखरः स्वीचकार। काव्यालंकारः अस्य प्रधान ग्रन्थः यत्र साहित्यविषयकाः सिद्धान्ताः सविस्तरं वर्णिताः। ग्रन्थे रस-वृत्तिप्रभृतयः सम्यक् प्रकारेण विचारिकाः परन्तु अलंकाराणां समीक्षा एव ग्रन्थस्य प्रमुखं प्रयोजनम्। अनेन नवभिः रसैः सह वात्सल्य रसोऽपि स्वीकृतः।

७.भट्टनायकः- विशेषरूपेण भट्टनायकस्य परिचयस्तु न प्राप्यते परन्तु रुय्यकः महिमभट्टः अभिनवगुप्तादयः अस्य मतं स्वीकीयेषु सिद्धान्त ग्रन्थेषु गृहीतवन्तः। एत एव विद्वांसः भट्टनायकस्य केवलं हृदयदर्पणनामकम् सिद्धान्तग्रन्थं मन्यन्ते। रसनिष्पत्तिविषये अयम् भुक्तिवादी अस्ति किं बहुना साधारणीकरणसिद्धान्तस्य प्रथमो हि प्रवर्तक आचार्यः।

८.मुकुलभट्टः-नवभ्याः शताब्द्याः प्रारम्भे समुत्पन्न कश्मीरनिवासी खल्वयम् आचार्यः अभिधावृत्तिमातृका अस्य ग्रन्थः यथोक्तञ्च स्वयमेव तेन -

**भट्टकल्लट पुत्रेण मुकुलेन निरूपित। सूरिप्रबोधनायेय मभिधावृत्तिमातृका।।**

अत्र ग्रन्थे अभिधावृत्तिरेव महत्या खलु सूक्ष्मेक्षिकया विस्तरेण समीक्षिता।

९.प्रतीहारेन्दुराजः- कश्मीरनिवासी अयम् मुकुलभट्टस्य प्रमुखः शिष्यः आसीत्। एष उद्भटालंकारसारसंग्रहस्य लघुवृत्तिकर्ता अस्ति।

१०.आनन्दवर्धनः- असौ कश्मीरराजस्य अवन्तिवर्मणः सभापतिरासीत्। पण्डितराजो जगन्नाथस्तु-''साहित्यमार्गस्य परिष्कारकोऽयम्'' इति कथितवान्। ध्वन्यालोकः साहित्यक्षेत्रे सुपरिचितः सुप्रसिद्धः ग्रन्थोऽस्ति। अत्र चत्वार उद्योता अत्र कारिकाः वृत्तिः उदाहरणानि च सन्ति येषु ध्वनिसिद्धान्तः संस्थापितः। प्रथमे ध्वनिविरोधिनां मतानि समीक्षितानि द्वितीय-तृतीययोः ध्वनि प्रकरणानि समालोचितानि तथा चतुर्थे उद्योते ध्वनितत्त्वस्य उपयोगिताः सुस्पष्टतया प्रतिपादिताः। अस्य ग्रन्थत्रयं लभ्यते यथा-अर्जुन चरितम् देवकी चरितम् विषमबाणलीला च

११.महिमभट्टः-ध्वनितत्त्वस्य विरोधी अयम् आचार्यः एकादश्याः शताब्द्याः प्रारम्भे जातः। कश्मीरनिवासी अस्ति अस्य प्रमुखः ग्रन्थः व्यक्तिविवेकः अत्र त्रयो विमर्शाः। ध्वनेः अनुमाने अन्तर्याव एव अस्य प्रमुखं प्रयोजनम्।

१२.कुन्तकः-

**वक्रानुरजनीञ्जनीमुक्तिं नित्यं चञ्चूपुटे वहन्। कुन्तकः क्रीडति भृशं कीर्तिस्फटिकपञ्जरे।।**

इत्याप्त वचनानुसारेण वक्रोक्तिजीवितकारस्य कुन्तकस्य अत्यधिकं महत्त्वम् अत्र काव्यस्य प्रमुखगुणरूपेण वक्रोक्तिरेव प्रतिष्ठापिता। अनेन षट् प्रकारा वक्रोरिक्तः वर्णिता यथा -

| | |
|---|---|
| वर्ण विन्यासवक्रता | वाक्यवक्रता |
| पदपूर्वार्द्ध वक्रता | प्रकरण वक्रता |
| प्रत्यय वक्रता | प्रबन्ध वक्रता |

१३.अभिनवगुप्तः-- नाटयशास्त्रप्रवर्तकस्य भरतमुनेः नाटयशास्त्रस्य अभिनवभारती नाम्नीटीका अस्ति तथा ध्वन्यालोकस्य लोचननाम्नीटीका अस्ति अनयोः रचयिता अभिनवगुप्तः अस्ति। अयम् शैव सम्प्रदायस्य आचार्यः साहित्ये च व्यञ्जनावादी ध्वनिवादी चास्ति। अस्य रसमीमांसा वैज्ञानिकी युक्तियुक्ता च।

१४.शौद्धोदनिः-अयं जैनालंकारसूत्रकर्ता। अलंकारशेखर ग्रन्थे नागरिकरूपेण सूत्राणि सन्ति। अयम् साहित्यकारात् प्रेमचन्दादपि अतिप्राचीन।

१५.वाञ्भटः-वाग्भटालंकाराय प्रसिद्धोऽयं वाग्भटः हेमचन्द्रादपि प्राचीनः। जैन साहित्ये सुप्रसिद्धं पञ्चदशसर्ग विभक्तं काव्यमिदम्।

१६.रुय्यकः-अलंकार सर्वस्वकारोऽयम्। कश्मीरराजस्य सचिवोऽयम्। द्वादशी शताबदीकालिकम् अस्य जन्म। अनेन शब्दार्थालंकारा निरूपिताः।

१७.भोजराजः-सरस्वती कण्ठाभरणकारोऽयम् रामायण चम्पू-शृंगारप्रकाशौ अपि रचयामास। शृंगाररसस्य एव विकारस्वरूपा अन्ये रसा इति भोजराजमतम्। स्वग्रन्थे अनेन गुणालंकारदोषादयः वर्णिताः।

१८.मम्मटः-कश्मीरनिवासी काव्यप्रकाशकारेऽयम् सरस्वतीवरदपुत्र इव। व्याकरणेऽपि लब्धप्रतिष्ठो विद्वान् मम्मटः ''ध्वनिप्रस्थापनाचार्य'' इत्युपाधि विभूषितो बभूव। ध्वनिसम्प्रदायस्य परमपोषकः।

१९.पीयूषवर्षजयदेवः-विदर्भ प्रान्तस्य कुण्डिनपुरनिवासी विद्वान् जयदेवः। अलंकारवादी अययाचार्यः मम्मटमतं खण्डयामास यत् -

**अंगीकरोति यः काव्यं शब्दार्थावनलंकृती। असौ न मन्यते कस्मादनुष्णमनलं कृती।।**

इति चन्द्रालोकः।

अस्य द्वितीया कृतिः प्रसन्नराधवम् संस्कृत साहित्ये अनेके जयदेवाः। प्रसिद्धस्य गीतगोविन्दस्य रचयिताऽपि अयमेव जयदेव इति अनुमीयते। अस्य पिता महादेवः माता च सुमित्रा। अत्र चन्द्रालोके दशमयूखाः यत्र काव्यशास्त्रस्य प्रारम्भिकं ज्ञानं वर्तते।

२०.विश्वनाथः- साहित्यदर्पणस्य रचयिता आचार्य विश्वनाथः उत्कलनरेशस्य नृसिंहदेवस्य 'सान्धिविग्रहिक' प्रधानमन्त्रिपदे आसीन आसीत् अयं साहित्यशास्त्रपारंगतः कविराजः यथोक्तञ्च -

**अशेषभाषा रमणीभूजङ्गः साहित्यविद्यार्णवकर्णधारः। ध्वन्यध्वनि प्रोढाधियां पुरोगः श्रीविश्वननाथः कविचक्रवर्ती।।**

अस्यपिता चन्द्रशेखरः पितामहश्च नारायणदासः। पितृव्यः चण्डीदासः यस्य पुत्रेण अनन्तदासेन साहित्यदर्पणस्य लोचनटीका लिखिता। अस्य ग्रन्था यथा-

राघवविलासम् महाकव्यम्
कुवलयाश्व चरितम् प्राकृतकाव्यम्
चन्द्रकलावाटिका
प्रभावती परिणयम् नाटिका
प्रशस्तरत्नावलिः
नरसिंह विजयः
कंसवधम्
साहित्यदर्पणः
काव्यप्रकाशदर्पणः

२१.अप्पयदीक्षितः-दर्शने साहित्ये च पारंगत विद्वान् अप्पयदीक्षितः दक्षिणंभारते काञ्चीनिकटे अडप्पलग्रामे जन्म जग्राह। अस्य पिता श्री रंगराजाध्वरिः अनेन अनेके ग्रन्था रचिताः तेषु वृत्तिवार्तिकम् चित्रमीमांसा कुवलयानन्दश्चेति प्रसिद्धाः। अप्पयदीक्षितः सिद्धान्तकौमुदीरचयिता भट्टोजिदीक्षितश्च रंगराजाध्वरेः शिष्यौ सहपाठिनौ चास्ताम्।

२२.पण्डितराजो जगन्नाथः-तैलंग प्रदेशे पेरुभट्टात् लक्ष्म्यां समुत्पन्नः पण्डितराजः संस्कृतसाहित्यस्य उत्कृष्टकोटिको विद्वान्। दिल्लीश्वरः शाहजहाँनामकः वाराणसीप्रकासिनं पण्डितराजं स्वपुत्रस्य दाराशिकोहस्य अध्यापनाय आमन्त्रयामास तस्य प्रौढ पाण्डित्येन सन्तुष्टो भूत्वा पण्डितराज इत्युपाधिद्वारा विभूषयामास।

यौवनन्तु दिल्लीश्वरस्य आश्रये यापिंत परन्तु अन्तसमयः मथुरायाम्। अस्य प्रसिद्धो ग्रन्थः रसगंगाधरः यत्र काव्यप्रकाशकारादिकस्य मतानि खण्डितानी किं बहुना अप्पयदीक्षितस्य तु अयम् शाश्वतविरोधी आसीत्।

पण्डितराजानन्तरं भारतवर्षे कोऽपि विशिष्ट विद्वान् काव्यजगति न बभूव किल इत्थमन्येऽपि बहवः आचार्या बभूवुः।

**अलंकारशास्त्रसम्प्रदायः**

काव्यशास्त्रस्य सुदीर्घा परम्परा यत्र काव्यस्यात्मा क इति विषये महती विचारपरम्परा प्रादुर्बभूव तत्र अनेके सम्प्रदायाः जाता यत्र आचार्यैः स्वस्वमत्यनुसारेण काव्यात्मनः मीमांसा कृता यथा-

| | |
|---|---|
| १.रससम्प्रदायः | भरतमुनिनिप्रभृतिः |
| २.अलंकार संप्रदायः | भामहः रुद्रटादिः |
| ३.रीति सम्प्रदायः | दण्डि वामनादिः |
| ४.वक्रोक्तिसम्प्रदायः | कुन्तकः |
| ५.ध्वनिसम्प्रदायः | आनन्दवर्धनः अभिनवगुप्त मम्मटादिः |
| ६.औचित्यसम्प्रदायः | क्षेमेन्द्रः |

१.रससम्प्रदायः-दधानः कलशे रक्षम् ऋग्वेदः रसो वै सः रसं ह्मेवायंलब्ध्वानन्दी भवति तैतरीयोषनिषद् इत्यनुसारेण वैदिके वाङ्मये रसशब्दस्य उल्लेखः प्राप्यते बहुत्र परन्तु साहित्यक्षेत्रे रसशब्दस्य प्रयोगः नाटयशास्त्रप्रवर्तकेन भरतमुनिना कृतः काव्यमीमांसाकारः राजशेखरः कथयामास यत् स्वयम्भूः ब्रह्मा सर्वप्रथमं रसविषयम् उपदेशं नन्दिकेश्वराय प्रदत्तवान् स न सम्प्रति सुलभः। आदिकावेः वाल्मीकेः शोकः श्लोकत्वमागतः तेन काव्यशास्त्रे करुणरस्य सूत्रपातः।

विभावाानुभाव व्यभिचारिसंयोगाद् रसनिष्पत्तिः इति रससूत्रमाधारीकृत्य विविधा व्याख्याः प्रस्तुताः यथा-भट्टलोल्लटस्य उत्पत्तिवादः, शंकुकस्य अनुमितिवादः भट्टनायकस्य भुक्तिवादः अभिनवगुप्तस्य अभिव्यक्तिवादः एते प्रमुखाः अन्येऽपि नव्यादयः सन्ति।

**शृंगारहास्यकरुणरौद्रवीरभयानकाः बीभत्सोऽद्भुत इत्यष्टौ शान्तोऽपि नवमो रसः**

इत्थं वाक्यं रसात्मकं काव्यम् - इति रससम्प्रदायः

२.अलंकार सम्प्रदायः- अस्यप्रवर्तक आचार्यः भामहः तस्यटीकाकाराः उद्भट- रुद्रटादयः। आचार्यः दण्डी अपि काव्ये अलंकार प्रधानतां स्वीकरोति यथा -

काव्यशोभावरान् धर्मानलंकारान् प्रचक्षते। आचार्य भरतेन तु चत्वारः अलंकारः निरूपिता यथा- उपया रूपकम् दीपकम् यमकञ्च। अन्यैः आचार्यैः अनेके अलंकाराः वर्णिता तेन अलंकारविकास यात्रा दीक्षितपर्यन्तम् १२५ मिता जाता।

३.रीतिसम्प्रदायः-पदसंघटना रीतिरंगसंस्थाविशेषवत् अथवा विशिष्टा पदरचना रीतिः इत्यनुसारेण रीतिसम्प्रदायस्य प्रवर्तकः आचार्यः वामनः रीतिरात्मा काव्यस्य इति सिद्धान्तितवान्। वैदर्भी गौडी लाटी पाञ्चाली चेति चतस्रः रीतयः। आचार्य दण्डिना अपि वैदर्भमार्गः गौडमार्ग इति मार्ग द्रयं समासूत्रितम्।

४.वक्रोक्तिसम्प्रदायः- अस्य प्रवर्तक आचार्य कुन्तकः तदनुसारेण वैदगध्य भंगीभणितिः वक्रोक्तिः वक्रा अर्थात् साधारण जनकथनप्रकारात् भिन्ना चमत्कारपूर्णा उक्तिरेव वक्रोक्तिः अर्थात् केनापि विशिष्टेन प्रकारेण उक्तिः वक्रोक्तिः काव्य जीवितं यथोक्तञ्च-

**वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा। यत्रालंकारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति।।**

५.ध्वनिसम्प्रदायः-अस्य प्रवर्तकः आनन्दवर्धनः ध्वन्यालोककारः अस्य लोचनटीकाकारः अभिनवगुप्तः न केवलं संस्कृत काव्यशास्त्रस्य अपितु विश्वस्यापि विश्वस्य काव्यशास्त्रस्य इतिहासस्य निधिस्वरूपः। यथोक्तञ्च -

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्। यत्तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवांगनासु।।

ध्वनिविरोधिनः महिभट्टादय बभुवुः परन्तु काव्यस्यात्मा ध्वनिरिति सिद्धान्ततस्तु दृढमूल एव अस्ति।

६.औचित्यसंप्रदायः-आचार्य क्षेमेन्द्रः अस्य प्रवर्तकः अस्यमतेन अनौचित्यादृते नान्यद् रसभंगस्य कारणम् अर्थात् औचित्यमेव रसस्यपराकाष्ठा। अयम् कश्मीरनिवासी अभिनवगुप्तात् साहित्यशिक्षां गृहीतवान् इत्यलम्।

# विषयानुक्रमणी

**प्रथमः परिच्छेदः**

मंगलाचरणम्
काव्यमाहात्म्यम्
दोषाः
प्रयोजनम्
काव्यशरीरम्
काव्यस्य त्रैविध्यम्
सर्गबन्धलक्षणम्
सर्गबन्धेवर्ण्य विषयाः
सर्गबन्धे वृत्तविचारः
नायक प्रतिनायक विचारः
गद्य प्रभेदौ
आख्याधिका-कथा भेदविचारः
कथाख्यायिकयो रेक जातित्वम्
वाड्.मयस्य संस्कृतादिभिः चातुर्विध्यम्
महाराष्ट्र भाषा प्रशंसा
प्रबन्ध विशेषे भाषानियमः
प्रेक्ष्य श्रव्यादि विचारः
वैदर्भ मार्गस्य दशगुणाः
श्लेष
प्रसादः
समता
माधुर्यम्
श्रुतिसाम्येन माधुर्यम्
वर्णानुप्रासः
यत्रकम्
अग्राम्यता महत्त्वम्
ग्राम्यता
सुकुमारता
अर्थव्यक्तिः
उदारता, ओजः
कान्तिः, समाधिः
मार्गोपसंगारहरः काव्यस्य कारणम्

**द्वितीयः परिच्छेदः**

अलंकार लक्षणम्
समुद्देशः
स्वभावोक्तिः
उपयालक्षणम्
धर्मोपमा
वस्तूपमा
विपर्यासोपमा
अन्योन्योपमा
नियमोपमा
अनियमोपमा
समुच्चययोपमा
अतिशयोपमा
उत्प्रेक्षितोपमा
अद्भुतोपमा
मोहोपमा
संशयोपमा
निर्णयोपमा
श्लेषोपमा
निर्णयोपमा
समानोपमा
निन्दोपमा
प्रशंसोपमा
आचिख्यासोपमा
विरोधोपमा
प्रतिषेधोपमा
असाधारणोपमा
चटूपमा
तत्त्वाख्यानोपमा
अभूतोपमा
असंभावितोपमा
बहूपमा
विक्रियोपमा
मालोपमा
वाक्यार्थोपमा
प्रतिवस्तूपमा
तुल्ययोगोपमा
हेतूपमा
उपमा दोष विवेचनम्
उदाहरणानि
उपमा वाचकाः शब्दाः